# शब्दविमर्शः - खच्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## द्विषन्तपः।

वाक्षु महती शक्तिः विद्यते। अत एव न वृथा वाक्यं समुच्चार्यतामिति साधनपञ्चके शङ्करभगवत्पादाः। एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति श्रुतिः। तादृशः शब्दप्रयोगकुशलः कश्चन पुराणवीरोऽवर्तत योऽसौ वैय्याकरणैरनुकार्यः। कोऽसौ ? आञ्जनेयः। सत्यं मितं पथ्यमल्पञ्च ब्रूयाद्वैय्याकरणैः विशेषतः। आञ्जनेयवत्। किं वैय्याकरणैर्विशेषत इति। ते खलु शब्दशास्त्रवेत्तारः। वस्तुतः सर्वैरपि तथा प्रयतितव्यम्। यतो हि अविद्यामायाच्छन्नस्यात्मनः प्रतिपत्त्युपायोऽस्मिन्नेव जन्मनि आप्तव्यः सर्वैः। तमुपायमाख्याति श्रुतिः यच्छेद्वाङ्मनसी प्राज्ञः इति। अये किमर्थं वाचं मनसि यच्छेत् ? शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति खलु आप्ता आमनन्ति। सखे निष्णातशब्दस्यात्र शब्दप्रयोगकुशल इत्यर्थमाख्यायताम्। न तु वाचालस्येति। किञ्च यच्छेद्वाङ्मनसी इत्यत्र वागत्रोपलक्षाणार्था सर्वेषामिन्द्रियाणामिति खलु भगवत्पादा ऊचुः। कथमत्र वाङ्मनसी इति समासः। नात्र समासः कोऽपि। वाक् मनसी इति च्छेदः। मनसि इत्येवार्थः। दीर्घश्छान्दसः। छान्दसानां तु प्रयोगाणां सर्वात्मना साधुत्वम्। अपौरुषेयत्वात्। अस्तु। आञ्जनेयवदिति कथने किं तात्पर्यम् ? सम्प्रार्थ्य ब्रह्मास्त्रमपि निष्प्रभं कृतवान्। इन्द्रजिता प्रयुक्तेन अस्त्रेण बद्धोऽपि वरबलादुन्मुक्तमात्मानं जानन्नपि पितामहभक्त्या बन्धन एव तस्थौ। तद्वाचैव रामलक्ष्मणयोः विभीषणेन मैत्री संवृत्ता। एवमितरत्रापि रामायणे आञ्जनेयस्य वाक्प्रयोगमहिमा दरीदृश्यते।

रामलक्ष्मणौ यदा हनूमन्तमद्राष्टां ततः प्रभृति समस्तेऽपि रामायणे न किञ्चिद्वृत्तं हनूमता विना। यद्येतादृशोऽनुचरो लभ्येत स्वामी किं किं न साध्नुयात्। सुग्रीवकिङ्करो रामभक्तः!

भट्टिकाव्यस्य सुग्रीवाभिषेकनाम्नि षष्ठे सर्गेऽयं प्रसङ्गो यत्र रामलक्ष्मणयोः हनूमता सङ्गमो वर्ण्यते। सीतामन्विषन्तौ रामलक्ष्मणौ ऋष्यमूकमगच्छताम्। तत्र वसानः सुग्रीवस्तौ बालिप्रणिधी मत्वा तयोः वृत्तान्तं ज्ञातुं मारुतिं प्रायुङ्क्त। हनूमच्चोदितौ तौ स्ववृत्तान्तमादिदिशतुः। कपिश्च स्वस्वामिनं सुग्रीवं बालिना भ्रात्रा निराकृतं मित्रीयन्तमाख्यत्। स्वात्मानञ्च तद्दूतम्। सुग्रीवेण सख्यं कृत्वा दशग्रीवं निहन्तासीति रामसुग्रीवयोः मैत्रीसाधनार्थं यतमानो हनूमानाह - प्रियंवदोऽपि नैवाहं ब्रुवे मिथ्या परन्तप। सख्या तेन दशग्रीवं निहन्तासि द्विषन्तपम्।। (भट्टिकाव्यम् 6.101)। प्रियंवदतया लोको मिथ्या वदति। अहं तावत् प्रियंवदोऽपि नैव मिथ्या वदामि। नाम सुग्रीवेण मित्रेण शत्रूणामुपतापयितारं रावणं हनिष्यतीति तव प्रीतिसम्पादनार्थमनृतं वदामीति मा चिन्तीदित्यर्थः। किमत्रापि भवानाञ्जनेयस्य वाक्पाटवमुद्धर्तुकामः ? न तथा। खच्प्रत्ययान्तशब्दमाविष्कर्तुमुद्यतामहे। द्विषन्तपशब्दोऽत्र प्रयुक्तः। अत्र 'द्विषत्परयोस्तापेः' (3.2.39) इति सूत्रेण खच्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुमागमः। पद्येऽस्मिन् प्रियंवदशब्दः खच्प्रत्ययान्तो वर्तते। तद्विषये पूर्वतनलेखे विशदं अलेखिष्म।

तदास्ताम्। यियक्षमाणेनाहूतः पार्थेनाथ मुरं द्विषन्। अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः।। (शिशुपालवधम् 2.1)। इत्यस्मिन् माघपद्ये मुरं द्विषन्निति प्रयोगः कथं सम्पद्यते ? को वात्र दोषः ? दोष इति न ब्रूमः। द्विषन्तपशब्दवद् दृश्यते। द्विषन् शब्दः श्रूयते। मध्ये मुमागमोऽपि दृश्यते। क्रमो व्यत्येति। मुरशब्दो नूतनः। एतेन सन्दिह्महे स्म किं मुरशब्दे उपपदेऽपि खच्प्रत्ययस्तापेरिति ? द्विषन्मुरमित्यपि प्रयोगो दृश्यते। द्विषन्

इत्यत्र ‘द्विषोऽमित्रे’ (3.2.131) इति सूत्रेण शतृप्रत्ययः। तद्योगे च मुरमिति ‘न लोकाव्ययनिष्ठाखलर्थतृनाम्’ (2.3.69) इति कर्मणि षष्ठीनिषेधः। ‘द्विषः शतुर्वा वचनम्’ इति वार्तिकेन वैकल्पिकोऽयं निषेधः। अथ कथं प्रयोगान्तरं प्रदर्शितम्। तत्राप्येवमेव। आनुपूर्वी व्यत्येति।

‘द्विषत्परयोस्तापेः’ (3.2.39) इति सूत्रेण द्विषत् पर इत्येतयोः कर्मणोरुपपदयोः ‘तप सन्तापे’ (भ्वा.985), ‘तप दाहे’ (भ्वा.1819) इत्यनयोर्धात्वोरविशेषेण खच्प्रत्ययो विधीयते। तयोरत्र द्विषन्तपशब्दस्योदाहरणमुदधराम। अग्रिमलेखे परन्तपशब्दमुदाहरिष्यामहे।